# सप्तमः पाठः

# तेय्यम्-मनोरञ्जकम्

## पाठप्रवेशः

हास्यरसप्रधानं प्रहसनं नाम दृश्यकलारूपमधिकृत्य वयं पूर्वस्मिन् पाठे पठितवन्तः । युष्माकं प्रदेशेष्वपि नानाविधानि कलारूपाणि द्रष्टुं शक्यन्ते । तेषु कानिचन रङ्गमण्डपेषु अपराणि आराधनालयादिषु अन्यानि कानिचित् चतुष्पथेषु च अवतारयन्ति । एतेषां मध्ये अनुष्ठानकलारूपाणां विशेषतां पश्यामः।

## आमुखम्

दृश्यकला प्रायेण स्थानभेदानुसारं सुकुमारकला अनुष्ठानकला चेति द्विधा भवति । नृत्तं, गीतं, वाद्यम् इत्येतानि तौर्यत्रिकम् इत्युच्यते । तैः साकं चित्रशिल्पादीनि च प्रसिद्धानि भवन्ति । सर्वाण्येतानि सामान्येन सुकुमारकला इति कथ्यते । एतानि यदा आराधनाविधिषु विशेषेण संयोज्यन्ते तदा तानि अनुष्ठानकला इति व्यवह्रियते । सोपानसंङ्गीतम्, तिटम्पुनृत्तम्, कलमेषुत्त् इत्येतानि एवम् अनुष्ठानकलारूपेषु भवन्ति । नृत्त-गीत-वाद्य-चित्रलेखनादीनि सर्वाण्यपि संयोज्य अराधनालयेषु अनुष्ठीयमानं कलारूपं भवति तेय्यम्। मुटियेट्ट्, पटयणि, कलमेषुत्तुपाट्ट् इत्यादिष्वपि नृत्तगीतादीनां प्रयोगाः प्राचुर्येण दृश्यन्ते । अस्मिन् पाठभागे तेय्यमिति कलारूपस्य सामान्यविवरणं प्रदत्तमस्ति।



उत्तरकेरलीयानां परम्परागतम् अनुष्ठानकलारूपं भवति तेय्यम् । पूर्विकाणां वीरपुरुषाणाम् इतिहासपुरुषाणां वा महच्चरितानि अनुस्मर्तुं कलारूपमिदम् आविष्कृतमभवत् । ईश्वरः इत्यर्थे “दैवम्” इति पदं कैरल्यां प्रसिद्धमस्ति । तस्य पदस्य ग्राम्यरूपभेदोऽस्ति ‘तेय्यम्’ इति । आर्तानां जनानां परिदेवनं श्रुत्वा तान् समाश्वासयितुं भूमावागता देवता अस्ति तेय्यमिति विश्वसन्ति ।

अतिसुन्दरेऽस्मिन् कलारूपे चतुर्विधाभिनयाः सन्ति । रक्तवर्णैः वस्त्रैः, हरिद्रादिभिः कृतैः अङ्गरागैः, पुष्पमालाद्यैः विभूषणैः समलंकृतः देवतावेषधारी वाद्यघोषैः साकं क्षेत्राङ्कणं प्रविश्य नृत्यति । सः नर्तकः ‘कोलधारी’ इति व्यवह्रियते । नृत्तावसरे चेण्डा, चीनि, तुटि, इलत्तालम्, इत्यादीनि वाद्योपकरणानि वादयन्ति । कोलधारिणः मूर्तिभेदानुसारं चापः, बाणः, दण्डः, खड्गः, चर्म इत्यादीन् आयुधान् धरन्ति ।



अस्य कलारूपस्य शिरोभूषणं “मुटि” इति कथ्यते । मूर्तिभेदानुसारं शिरोऽलङ्कारेषु, मुखालङ्कारेषु, वस्त्रालङ्कारेषु, आभरणेषु तथा नृत्तेष्वपि वैविध्यानि भवन्ति । मनयोला, चायिल्यम्, हरिद्रा, अञ्जनमसी, नालिकेरपत्रम् इत्यादीनि प्रकृतिदत्तानि वस्तूनि अलङ्काराय कल्पन्ते ।



तेय्यरूपेषु तथा आचारेषु अनुष्ठानेषु च वैविध्यं दरीदृश्यते । भद्रकाली, नागभगवती, चामुण्डी, मुच्चिलोट्ट् भगवती इत्येताः मातृदेवताः सन्ति। गुलिकः, विष्णुमूर्तिः, घण्टाकर्णः विषकण्ठः इत्येते बहवः पुरुषमूर्तयश्च विद्यन्ते। तेष्वपि केचन उग्रमूर्तयः अग्निप्रवेशम् आयुधाभ्यासं च कुर्वन्ति । कतिवन्नूर् वीरन्, कण्टनार् केलन् इत्येषां मूर्तीनामनुष्ठानं प्रेक्षकान् विस्मापयति । प्रतिवर्षं निश्चितासु तिथिषु प्रचाल्यमानमिदम् अनुष्ठानकलारुपं सर्वथा सर्वेषाम् आनन्ददायकं भवति ।

**पदच्छेदः**

ग्राम्यरूपभेदोऽस्ति - ग्राम्यरूपभेदः +अस्ति ।

अतिसुन्दरेऽस्मिन् - अतिसुन्दरे + अस्मिन् ।

भूमावागता - भूमौ + आगता ।

**विग्रहः**

शिरोऽलङ्कारः - शिरसः अलङ्कारः ।

परम्परागतम् - परम्परया आगतम् ।

अनुष्ठानकलारूपम् - अनुष्ठानं च तत् कलारूपं च ।

ग्राम्यरूपम् - ग्रामे भवं ग्राम्यम्, ग्राम्यं च तत् रूपं च ।

देवतावेषधारी - देवतायाः वेषं धरति यः सः देवतावेषधारी ।

क्षेत्राङ्कणम् - क्षेत्रस्य अङ्कणम् ।

शिरोभूषणम् - शिरसः भूषणम् ।

वैविध्यम् - विविधस्य भावः ।

दरीदृश्यते - भृशं पुनः पुनः वा दृश्यते ।

## पठनप्रवर्तनानि

**तेय्यम् इति कलारूपे प्रयुक्ताः सङ्केतसंज्ञाः चित्वा पूरयतु ।**

**उदा - नृत्तगीतवाद्यम् - तौर्यत्रिकम् ।**

दैवम् - .........................

तेय्यवेषधारी - .........................

शिरोऽलङ्कारः - .........................

**श्रद्धेयौ अंशौ**

चयनसामर्थ्यम् ।

अर्थावगमनम् ।

**सूचनानुसारं तेय्यम् इति कलारूपम् अधिकृत्य लघुटिप्पणीं लिखतु।**

**सूचना -** अनुष्ठानकलारूपं - पूर्विकाणां चरितं - तेय्यम् इति संज्ञा - भक्तानाम् अनुग्रहाय - कोलधारी - वाद्यघोषः - नर्तनम्।

**श्रद्धेयाः अंशाः**

भाषाशुद्धिः।

आशयव्यक्तता।

सर्वासां सूचनानां स्वीकारः।

**तेय्यकलारूपे स्वीकृतानाम् वाद्योपकरणानाम् अलङ्कारवस्तूनां च पट्टिकां लिखतु।**

| | वाद्योपकरणम् | अलङ्कारवस्तूनि |
|---|---|---|
| उदा- | चेण्टा | हरिद्रा |
| | ................ | ................ |
| | ................ | ................ |

**श्रद्धेयौ अंशौ**

चयनसामर्थ्यम्।

उचितक्रमीकरणम्।

**केनचिद् कलाकारेण सह कृतम् अभिमुखभाषणं सम्भाव्य लिखतु।**

छात्रः - भो आचार्य। सुप्रभातम्।

आचार्यः - सुप्रभातम्। ..................... ।

छात्रः - समीपस्थाद् उच्चविद्यालयात् आगतोऽस्मि।

आचार्यः - अस्तु। ..................... ।

छात्रः - अनुष्ठानकला नाम का इति ज्ञातुमिच्छामि। तदर्थमागतोऽस्मि।

आचार्यः - वदाम्यहम्। सुकुमारकलारूपाणि

यत्र .....................

छात्रः - द्वित्राणि .....................।

आचार्यः - सोपानसङ्गीतम्, कलमेषुत्त् इत्यादयः।

छात्रः - कृतार्थोऽस्मि । भवते धन्यवादं समर्पयामि ।

आचार्यः - ..................... गच्छतु पुनर्दर्शनाय ।

**श्रद्धेयौ अंशौ**

उचितपदेन पूरणम् ।

आशयावगमनम् ।



**विविधानां कलारूपाणां चित्राणि समाहृत्य सम्पुटम् अथवा सद्यप्रदर्शिकां रचयतु ।**

**श्रद्धेयाः अंशाः**

चयनसामर्थ्यम् ।

आशयव्यक्ततता ।

उचितक्रमीकरणम् ।

## क्रियापदपरिचयः

**नृत्यति -** नृती गात्रविक्षेपे परस्मैपदी लट् प्र.पु.ए.व ।
नृत्यति - नृत्यतः- नृत्यन्ति ।

**धरन्ति -** धृञ् धारणे उभयपदी परस्मैपदे लट् प्र.पु.ब.व ।
धरति - धरतः - धरन्ति ।

**विस्मापयति -** वि+स्मिङ् ईषद् हसने आत्मनेपदी णिचि परस्मैपदे लट् प्र.पु.ए.व ।
विस्मापयति - विस्मापयतः - विस्मापयन्ति ।

# अधिकविस्तरः

## मुटियेट्ट्

केरलेषु एरणाकुलं, कोट्टयम् , इटुक्कि जिल्लासु प्रचाल्यमानम् अनुष्ठानकलारूपं भवति मुटियेट्ट् । भद्रकाल्या कृतः दारिकवधः अस्य कलारूपस्य इतिवृत्तम्। चालक्कुटिप्पुषा, पेरियार् , मूवाट्टुपुषेत्यादीनां नदीनां तटेषु विद्यमानेषु देवीमन्दिरेषु इतरेषु देवस्थानेषु च कलारूपमिदं प्रचलति । चेण्टा, कुरुंकुषल्, इलत्तालं, कोम्प् इत्यादीनां वाद्यानां घोषेण अर्धरात्रावारभ्य प्रभातपर्यन्तं मुटियेट्ट् अवतारयति।

## पटयणी

दक्षिणकेरलदेशेषु प्रचलितं सर्वजनप्रियं प्राचीनकलारूपं भवति पटयणी । 'भटश्रेणी' इति संस्कृतशब्दात् व्युत्पन्नं भवति पटयणी नाम कैरलीपदमिति मन्यते। दारिकवधानन्तरमपि सक्रोधं तिष्ठन्त्याः देव्याः क्रोधस्य शमनाय परमेश्वरादिभिः देवताभिः भटैस्सह कृतम् आनन्दनर्तनमेव पटयणी इति विश्वसन्ति। भद्रकालीमन्दिरेषु एव कलारूपमिदं प्रचलति। पूर्वं त्रयोदशदिनेषु अनुष्ठिता पटयणी इदानीम् दिनेनैकेन समापयति।

प्रथमं 'काच्चिक्कोट्ट्' इति अनुष्ठानं तप्प् वाद्येन सह क्रियते। तत्तद्देशीयान् जनान् पटयणीसमाचरणम् अधिकृत्य उद्बोधयितुमेव क्रियामिमामाचरति । तदनन्तरं कोलं तुल्लल् आरभते। पूगपत्रेषु विविधानि भीतिदानि रूपाणि विलिख्य तन्मुखपटं धृत्वा नृत्यन्ति । रूपमिदं कोलम् इति उच्यते । यक्षिक्कोलम्, पक्षिक्कोलम्, कालन्कोलम्, पिशाचक्कोलम्, माटन्कोलम्, मरुताक्कोलम्, गन्धर्वन्कोलम् इत्यादीनि बहूनि कोलरूपाणि अस्मिन् कलारूपे दृश्यन्ते । कानिचन कोलानि खड्ग-पाश-दीपशिखादीनि शस्त्राणि धरन्ति। दीपज्वालप्रकाशे रात्रावेव कलेयम् अवतार्यते।

## सब्दकोशः

| संस्कृतम् | संस्कृतम् | कैरली | कन्नडा | आङ्गलम् |
|---|---|---|---|---|
| अतिचौक्षिणी | अतिमनोहारिणी | മനോഹാരിണി | ಸುಂದರಿ | Beautiful lady |
| अधीष्व | अध्ययनं कुरु | പഠിക്കൂ | ಕಲಿಯಿರಿ | You study |
| उत्तीर्य | तरणं कृत्वा | മറികടന്ന് | ಮೀರಿ | Having passed |
| उत्थाय | उत्थानं कृत्वा | എഴുന്നേറ്റിട്ട് | ಎದ್ದು | Having get up |
| एतु | आगच्छतु | വരൂ | ಬನ್ನಿ | Please come |
| कुठारिका | छेदनोपकरणम् | മഴു | ಕೊಡಲಿ | Axe |
| ख्यातिः | प्रसिद्धिः | പ്രസിദ്ധി | ಪ್ರಸಿದ್ಧಿ | Fame |
| चेटी | दासी | ദാസി | ದಾಸಿ | Maid servant |
| चौक्षम् | मनोहरम् | മനോഹരം | ಸುಂದರ | Beautiful |
| छन्दतः | इच्छानुसारम् | ഇഷ്ടം പോലെ | ಇಷ್ಟವಾದಂತೆ | As desired |
| दष्टम् | दंशनं कृतम् | കടിച്ചു. | ಕಚ್ಚಿದೆ | Bitten |
| नैर्मल्यम् | निर्मलता | ശുദ്ധം | ಶುದ್ಧ | Purity |
| परिक्लिन्ना | क्षीणा | ക്ഷീണിച്ചവൾ | ಆಯಾಸಗೊಂ-<br>ಡವಳು | Tired woman |
| परिव्राजकः | अवधूतः | സംന്യാസി | ಸನ್ಯಾಸಿ | Saint |
| प्रत्ययः | विश्वासः | വിശ്വാസം | ವಿಶ್ವಾಸ | Faith |
| बाढम् | सत्यम्/<br>अतिशयः | നല്ലത് | ಹೌದು | Yes it is |
| सर्वारम्भः | उपकरण<br>सम्भारः | ഔഷധപ്പെട്ടി | ಔಷಧಿಯ<br>ಪೆಟ್ಟಿಗೆ | Medicine box |
| सानुक्रोशः | सकरुणः | കരുണയോടെ | ಕರುಣೆಯಿಂದ | Compassionate |
| सीदति | कम्पते | വിറയ്ക്കുന്നു | ನಡುಗುತ್ತದೆ | Shivering |

गुणपाठप्रतिपादिकाः कथाः संपाद्य संस्कृतभाषया लिखतु।

## किमधिगतम्

| पठनप्रवर्तनानि | स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगतये प्रयत्नः विधेयः |
|---|---|---|---|
| लघूपन्यासं लिखति । | | | |
| सम्भाषणांशान् पूरयति । | | | |
| नाटकम् अवतारयति । | | | |
| कथापात्रनिरूपणं लिखति । | | | |
| रूपकाणां पट्टिकां पूरयति । | | | |
| कलारूपाणां सम्पुटम् रचयति । | | | |